# Natya Shastra Chapter 13

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૧૩

## Document Information

Text title : naaTyashaastra adhyaaya 13 karayuktidharmiivyanjaka

File name : natya13.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : Sowmya Krishnapur krsowmya at yahoo.com

Proofread by : Sowmya Krishnapur krsowmya at yahoo.com

Latest update : June 17, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૧૩

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્

અથ ત્રયોદશોઽધ્યાયઃ

યે તુ પૂર્વં મયા પ્રોક્તાસ્ત્રયો વૈ નાટ્યમણ્ડપાઃ ।
તેષાં વિભાગં વિજ્ઞાય તતઃ કક્ષ્યાં પ્રયોજયેત્ ॥ ૧॥

યે નેપથ્યગૃહદ્વારે મયા પૂર્વં પ્રકીર્તિતે ।
તયોર્ભાણ્ડસ્ય વિન્યાસો મધ્યે કાર્યઃ પ્રયોક્તૃભિઃ ॥ ૨॥

કક્ષ્યાવિભાગો નિર્દેશ્યો રઙ્ગપીઠપરિક્રમાત્ ।
પરિક્રમેણ રઙ્ગસ્ય કક્ષ્યા હ્યન્યા વિધીયતે ॥ ૩॥

કક્ષ્યાવિભાગે જ્ઞેયાનિ ગૃહાણિ નગરાણિ ચ ।
ઉદ્યાનારામસરિતસ્ત્વાશ્રમા અટવી તથા ॥ ૪॥

પૃથિવી સાગરાશ્ચૈવ ત્રૈલોક્યં સચરાચરમ્ ।
વર્ષાણિ સપ્તદ્વીપાશ્ચ પર્વતા વિવિધાસ્તથા ॥ ૫॥

અલોકશ્ચૈવ લોકશ્ચ રસાતલમથાપિ ચ ।
દૈત્યનાગાલયાશ્ચૈવ ગૃહાણિ ભવનાનિ ચ ॥ ૬॥

નગરે વા વને વાપિ વર્ષે વા પર્વતેઽપિ વા ।
યત્ર વાર્તા પ્રવર્તેત તત્ર કક્ષ્યાં પ્રવર્તયેત્ ॥ ૭॥

બાહ્યં વા મધ્યમં વાપિ તથૈવાભ્યન્તરં પુનઃ ।
દૂરં વા સન્નિકૃષ્ટં વા દેશં તુ પરિકલ્પયેત્ ॥ ૮॥

પૂર્વપ્રવિષ્ટા યે રઙ્ગં જ્ઞેયાસ્તેઽભ્યન્તરા બુધૈઃ ।
પશ્ચાત્પ્રવિષ્ટા વિજ્ઞેયાઃ કક્ષ્યાભાગે તુ બાહ્યતઃ ॥ ૯॥

તેષાં તુ દર્શનેચ્છુર્યઃ પ્રવિશેદ્રઙ્ગમણ્ડપમ્ ।

દક્ષિણાભિમુખઃ સોઽથ કુર્યાદાત્મનિવેદનમ્ ॥ ૧૦॥

યતો મુખં ભવેદ્ભાણ્ડં દ્વારં નેપથ્યકસ્ય ચ ।
સા મન્તવ્યા તુ દિક્ પૂર્વા નાટ્યયોગે ન નિત્યશઃ ॥ ૧૧॥

નિષ્ક્રામેદ્યશ્ચ તસ્માદ્વૈ સ તેનૈવ તથા વ્રજેત્ ।
યતસ્તસ્ય કૃતં તેન પુરુષેણ નિવેદનમ્ ॥ ૧૨॥

નિષ્ક્રાન્તોઽર્થવશાચ્ચાપિ પ્રવિશેદ્યદિ તદ્ગૃહમ્ ।
યતઃ પ્રાપ્તઃ સ પુરુષસ્તેન માર્ગેણ નિષ્ક્રમેત્ ॥ ૧૩॥

અથવાર્થવશાચ્ચાપિ તેનૈવ સહ ગચ્છતિ ।
તથૈવ પ્રવિશેત્ ગેહમેકાકી સહિતોઽપિ વા ॥ ૧૪॥

તયોશ્ચાપિ પ્રવિશતોઃ કક્ષ્યામન્યાં વિનિર્દિશેત્ ।
પરિક્રમેણ રઙ્ગસ્ય ત્વન્યા કક્ષ્યા વિધીયતે ॥ ૧૫॥

સમૈશ્ચ સહિતો ગચ્છેન્નીચૈશ્ચ પરિવાહિતઃ ।
અથ પ્રેક્ષણિકાશ્ચાપિ વિજ્ઞેયા હ્યગ્રતો ગતૌ ॥ ૧૬॥

સૈવ ભૂમિસ્તુ બહુભિર્વિકૃષ્ટા સ્યાત્પરિક્રમૈઃ ।
મધ્યા વા સન્નિકૃષ્ટા વા તેષામેવં વિકલ્પયેત્ ॥ ૧૭॥

નગરે વા વને વાપિ સાગરે પર્વતેઽપિ વા ।
દિવ્યાનાં ગમનં કાર્યં દ્વીપે વર્ષેષુ વા પુનઃ ॥ ૧૮॥

આકાશેન વિમાનેન માયયાપ્યથ વા પુનઃ ।
વિવિધાભિઃ ક્રિયાભિર્વા નાનાર્થાભિઃ પ્રયોગતઃ ॥ ૧૯॥

નાટકે ચ્છન્નવેષાણાં દિવ્યાનાં ભૂમિસઞ્ચરઃ ।
માનુષે કારણાદેષાં યથા ભવતિ દર્શનમ્ ॥ ૨૦॥

ભારતે ત્વથ હૈમે વા હરિવર્ષ ઇલાવૃતે ।
રમ્યે કિંપુરુષે વાપિ કુરુષૂત્તરકેષુ વા ॥ ૨૧॥

દિવ્યાનાં છન્દગમનં સર્વવર્ષેષુ કીર્તિતમ્ ।
ભારતે માનુષાણાઞ્ચ ગમનં સંવિધીયતે ॥ ૨૨॥

ગચ્છેદ્યદિ વિકૃષ્ટસ્તુ દેશકાલવશાન્નરઃ ।
અઙ્કચ્છેદે તમન્યસ્મિન્ નિર્દિશેદ્ધિ પ્રવેશકે ॥ ૨૩॥

અઙ્કઃ પ્રમાણં ગત્વા તુ કાર્યલાભં વિનિર્દિશેદ્ ।
તથાલાભે તુ કાર્યસ્ય અઙ્કચ્છેદો વિધીયતે ॥ ૨૪॥

ક્ષણો મુહૂર્તો યાનો વા દિવસો વાપિ નાટકે ।
એકાઙ્કે સ વિધાતવ્યો બીજસ્યાર્થવશાનુગઃ ॥ ૨૫॥

અઙ્કચ્છેદે તુ નિર્વૃત્તં માસં વા વર્ષમેવ વા ।
નોર્ધ્વં વર્ષાત્પ્રકર્તવ્યં કાર્યમઙ્કસમાશ્રયમ્ ॥ ૨૬॥

એવં તુ ભારતે વર્ષે કક્ષ્યા કાર્યા પ્રયોગતઃ ।
માનુષાણાં ગતિર્યા તુ દિવ્યાનાન્તુ નિબોધત ॥ ૨૭॥

હિમવત્પૃષ્ઠસંસ્થે તુ કૈલાસે પર્વતોત્તમે ।
યક્ષાશ્ચ ગુહ્યકાશ્ચૈવ ધનદાનુચરાશ્ચ યે ॥ ૨૮॥

રક્ષઃપિશાચભૂતાશ્ચ સર્વે હૈમવતાઃ સ્મૃતાઃ ।
હેમકૂટે ચ ગન્ધર્વા વિજ્ઞેયાઃ સાપ્સરોગણાઃ ॥ ૨૯॥

સર્વે નાગાશ્ચ નિષધે શેષવાસુકિતક્ષકાઃ ।
મહામેરૌ ત્રયસ્ત્રિંશદ્ જ્ઞેયા દેવગણા બુધૈઃ ॥ ૩૦॥

નીલે તુ વૈડૂર્યમયે સિદ્ધા બ્રહ્મર્ષયસ્તથા ।
દૈત્યાનાં દાનવાનાઞ્ચ શ્વેતપર્વત ઇષ્યતે ॥ ૩૧॥

પિતરશ્ચાપિ વિજ્ઞેયા શ ૃઙ્ગવન્તં સમાશ્રિતાઃ ।
ઇત્યેતે પર્વતાઃ શ્રેષ્ઠા દિવ્યાવાસાઃ પ્રકીર્તિતાઃ ॥ ૩૨॥

તેષાં કક્ષ્યાવિભાગશ્ચ જમ્બૂદ્વીપે ભવેદયમ્ ।
તેષાં ન ચેષ્ટિતં કાર્યં સ્વૈઃ સ્વૈઃ કર્મપરાક્રમૈઃ ॥ ૩૩॥

પરિચ્છ(ચ્છે)દવિશેષસ્તુ તેષાં માનુષલોકવત્ ।
સર્વે ભાવાશ્ચ દિવ્યાનાં કાર્યા માનુષસંશ્રયાઃ ॥ ૩૪॥

તેષાન્ત્વનિમિષત્વં યત્તન્ન કાર્યં પ્રયોક્તૃભિઃ ।
ઇહ ભાવા રસાશ્ચૈવ દૃષ્ટાવેવ પ્રતિષ્ઠિતાઃ ॥ ૩૫॥

દૃષ્ટ્યા હિ સૂચિતો ભાવઃ પુનરઙ્ગૈર્વિભાવ્યતે ।
એવં કક્ષ્યાવિભાગસ્તુ મયા પ્રોક્તો દ્વિજોત્તમાઃ ॥ ૩૬॥

પુનશ્ચૈવ પ્રવક્ષ્યામિ પ્રવૃત્તીનાન્તુ લક્ષણમ્ ।
ચતુર્વિધા પ્રવૃત્તિશ્ચ પ્રોક્તા નાટ્યપ્રયોગતઃ ।

આવન્તી દાક્ષિણાત્યા ચ પાઞ્ચાલી ચોઢ્રમાગધી ॥ ૩૭॥

અત્રાહ પ્રવૃત્તિરિતિ કસ્માત્ ? ઉચ્યતે પૃથિવ્યાં
નાનાદેશવેષભાષાચારવાર્તાઃ પ્રખ્યાપયતીતિ વૃત્તિઃ ।
પ્રવૃત્તિશ્ચ નિવેદને । અત્રાહ - યથા પૃથિવ્યાં બહવો
દેશાઃ સન્તિ , કથમાસાં ચતુર્વિધત્વમ્ ઉપપન્નં,
સમાનલક્ષણશ્ચાસાં પ્રયોગ ઉચ્યતે , સત્યમેતત્ ।
સમાનલક્ષણ આસાં પ્રયોગઃ । કિન્તુ
નાનાદેશવેષભાષાચારો લોક ઇતિ કૃત્વા લોકાનુમતેન
વૃત્તિસંશ્રિતસ્ય નાટ્યસ્ય વૃત્તીનાં મયા
ચતુર્વિધત્વમભિહિતં ભારતી સાત્ત્વતી કૈશિક્યારભટી
ચેતિ । વૃત્તિસંશ્રિતૈશ્ચ પ્રયોગૈરભિહિતા દેશાઃ । યતઃ
પ્રવૃત્તિચતુષ્ટયમભિનિર્વૃત્તં પ્રયોગશ્ચોત્પાદિતઃ । તત્ર
દાક્ષિણાત્યાસ્તાવત્ બહુનૃત્તગીતવાદ્યા કૈશિકીપ્રાયાઃ
ચતુરમધુરલલિતાઙ્ગાભિનયાશ્ચ । તદ્યથા -
મહેન્દ્રો મલયઃ સહ્યો મેકલઃ પાલમઞ્જરઃ ।
એતેષુ યે શ્રિતા દેશાઃ સ જ્ઞેયો દક્ષિણાપથઃ ॥ ૩૮॥

કોસલાઽસ્તોશલાશ્ચૈવ કલિઙ્ગા યવના ખસાઃ ।
દ્રવિડાન્ધ્રમહારાષ્ટ્રા વૈષ્ણા વૈ વાનવાસજાઃ ॥ ૩૯॥

દક્ષિણસ્ય સમુદ્રસ્ય તથા વિન્ધ્યસ્ય ચાન્તરે ।
યે દેશાસ્તેષુ યુઞ્જીત દાક્ષિણાત્યાં તુ નિત્યશઃ ॥ ૪૦॥

આવન્તિકા વૈદિશિકાઃ સૌરાષ્ટ્રા માલવાસ્તથા ।
સૈન્ધવાસ્ત્વથ સૌવીરા આવર્તાઃ સાર્બુદેયકાઃ ॥ ૪૧॥

દાશાર્ણાસ્ત્રૈપુરાશ્ચૈવ તથા વૈ માર્તિકાવતાઃ ।
કુર્વન્ત્યાવન્તિકીમેતે પ્રવૃત્તિં નિત્યમેવ તુ ॥ ૪૨॥

સાત્ત્વતીં કૈશિકીં ચૈવ વૃત્તિમેષાં સમાશ્રિતા ।
ભવેત્ પ્રયોગો નાટ્યેઽત્ર સ તુ કાર્યઃ પ્રયોક્તૃભિઃ ॥ ૪૩॥

અઙ્ગા વઙ્ગાઃ કલિઙ્ગાશ્ચ વત્સાશ્ચૈવોઢ્રમાગધાઃ ।
પૌણ્ડ્રા નેપાલકાશ્ચૈવ અન્તર્ગિરિબહિર્ગિરાઃ ॥ ૪૪॥

તથા પ્લવઙ્ગમા જ્ઞેયા મલદા મલ્લવર્તકાઃ ।

બ્રહ્મોત્તરપ્રભૃતયો ભાર્ગવા માર્ગવાસ્તથા ॥ ૪૫॥

પ્રાજ્યોતિષાઃ પુલિન્દાશ્ચ વૈદેહાસ્તામ્રલિપ્તકાઃ ।
પ્રાઙ્ગાઃ પ્રાવૃતયશ્ચૈવ યુઞ્જન્તીહોઢ્રમાગધીમ્ ॥ ૪૬॥

અન્યેઽપિ દેશાઃ પ્રાચ્યાં યે પુરાણે સમ્પ્રકીર્તિતાઃ ।
તેષુ પ્રયુજ્યતે હ્યેષા પ્રવૃત્તિશ્ચોઢ્રમાગધી ॥ ૪૭॥

પાઞ્ચાલા સૌરસેનાશ્ચ કાશ્મીરા હસ્તિનાપુરાઃ ।
બાહ્લીકા શલ્યકાશ્ચૈવ મદ્રકૌશીનરાસ્તથા ॥ ૪૮॥

હિમવત્સંશ્રિતા યે તુ ગઙ્ગાયાશ્ચોત્તરાં દિશમ્ ।
યે શ્રિતા વૈ જનપદાસ્તેષુ પાઞ્ચાલમધ્યમાઃ ॥ ૪૯॥

પાઞ્ચાલમધ્યમાયાં તુ સાત્ત્વત્યારભટી સ્મૃતા ।
પ્રયોગસ્ત્વલ્પગીતાર્થ આવિદ્ધગતિવિક્રમઃ ॥ ૫૦॥

દ્વિધા ક્રિયા ભવત્યાસાં રઙ્ગપીઠપરિક્રમે ।
પ્રદક્ષિણપ્રદેશા ચ તથા ચાપ્યપ્રદક્ષિણા ॥ ૫૧॥

આવન્તી દાક્ષિણાત્યા ચ પ્રદક્ષિણપરિક્રમે ।
અપસવ્યપ્રદેશાસ્તુ પાઞ્ચાલી ચોઢ્રમાગધી ॥ ૫૨॥

આવન્ત્યાં દાક્ષિણાત્યાયાં પાર્શ્વદ્વારમથોત્તરમ્ ।
પાઞ્ચાલ્યામોઢ્રમાગધ્યાં યોજ્યં દ્વારં તુ દક્ષિણમ્ ॥ ૫૩॥

એકીભૂતાઃ પુનશ્ચૈતાઃ પ્રયોક્તવ્યાઃ પ્રયોક્તૃભિઃ ।
પાર્ષદં દેશકાલૌ વાપ્યર્થયુક્તિમવેક્ષ્ય ચ ॥ ૫૪॥

યેષુ દેશેષુ યા કાર્યા પ્રવૃત્તિઃ પરિકીર્તિતા ।
તદ્વૃત્તિકાનિ રૂપાણિ તેષુ તજ્જ્ઞઃ પ્રયોજયેત્ ॥ ૫૫॥

એકીભૂતાઃ પુનસ્ત્વેતા નાટકાદૌ ભવન્તિ હિ ।
અવેક્ષ્ય વૃત્તિબાહુલ્યં તત્તત્કર્મ સમાચરેત્ ॥ ૫૬॥

સાર્થે બાહુલ્યમેકસ્ય શેષાણામથ બુદ્ધિમાન્ ।
યેષામન્યસ્ય બાહુલ્યં પ્રવૃત્તિં પૂરયેત્તદા ॥ ૫૭॥

પ્રયોગો દ્વિવિધશ્ચૈવ વિજ્ઞેયો નાટકાશ્રયઃ ।
સુકુમારસ્તથાવિદ્ધો નાટ્યયુક્તિસમાશ્રયઃ ॥ ૫૮॥

યત્ત્વાવિદ્ધાઙ્ગહારન્તુ ચ્છેદ્યભેદ્યાહવાત્મકમ્ ।
માયેન્દ્રજાલબહુલં પુસ્તનેપથ્યસંયુતમ્ ॥ ૫૯॥

પુરુષૈર્બહુભિર્યુક્તમલ્પસ્ત્રીકં તથૈવ ચ ।
સાત્ત્વત્યારભટીયુક્તં નાટ્યમાવિદ્ધસંજ્ઞિતમ્ ॥ ૬૦॥

ડિમઃ સમવકારશ્ચ વ્યાયોગેહામૃગૌ તથા ।
એતાન્યાવિદ્ધસંજ્ઞાનિ વિજ્ઞેયાનિ પ્રયોક્તૃભિઃ ॥ ૬૧॥

એષાં પ્રયોગઃ કર્તવ્યો દૈત્યદાનવરાક્ષસૈઃ ।
ઉદ્ધતા યે ચ પુરુષાઃ શૌર્યવીર્યબલાન્વિતાઃ ॥ ૬૨॥

નાટકં સપ્રકરણં ભાણો વીથ્યઙ્કનાટિકે ।
સુકુમારપ્રયોગાણિ માનુષેષ્વાશ્રિતાસ્તુ યે ॥ ૬૩॥

અથ બાહ્યપ્રયોગેષુ પ્રેક્ષાગૃહવિવર્જિતે ।
વિદિક્ષ્વપિ ભવેદ્રઙ્ગઃ કદાચિદ્ ભર્તુરાજ્ઞયા ॥ ૬૪॥

પૃષ્ઠ કુતપં નાટ્યે યુક્તા યતો મુખં ભરતાઃ ।
સા પૂર્વા મન્તવ્યા પ્રયોગકાલે તુ નાટ્યજ્ઞૈઃ ॥ ૬૫॥

દ્વારાણિ ષટ્ ચૈવ ભવન્તિ ચાસ્ય
રઙ્ગસ્ય દિગ્ભાગવિનિશ્ચિતાનિ ।
નાટ્યપ્રયોગેણ ખલુ પ્રવેશે
પ્રાચ્યાં પ્રતીચ્યાં ચ દિશિ પ્રવેશઃ ॥ ૬૬॥

વિધાનમુત્ક્રમ્ય યથા ચ રઙ્ગે
વિના પ્રમાણાદ્વિદિશઃ પ્રયોગે ।
દ્વારન્તુ યસ્માત્સમૃદઙ્ગભાણ્ડં
પ્રાચીં દિશં તાં મનસાઽધ્યવસ્યેત્ ॥ ૬૭॥

વયોઽનુરૂપઃ પ્રથમન્તુ વેશો વેશોઽનુરૂપશ્ચ ગતિપ્રચારઃ ।
ગતિપ્રચારાનુગતશ્ચ પાઠ્યં
પાઠ્યાનુરૂપાભિનયશ્ચ કાર્યઃ ॥ ૬૮॥

ધર્મી યા દ્વિવિધા પ્રોક્તા મયા પૂર્વં દ્વિજોત્તમાઃ ।
લૌકિકી નાટ્યધર્મી ચ તયોર્વક્ષ્યામિ લક્ષણમ્ ॥ ૬૯॥

સ્વભાવભાવોપગતં શુદ્ધં ત્વવિકૃતં તથા ।

લોકવાર્તાક્રિયોપેતમઙ્ગલીલાવિવર્જિતમ્ ॥ ૭૦॥

સ્વભાવાભિનયોપેતં નાનાસ્ત્રીપુરુષાશ્રયમ્ ।
યદીદૃશં ભવેન્નાટ્યં લોકધર્મી તુ સા સ્મૃતા ॥ ૭૧॥

અતિવાક્યક્રિયોપેતમતિસત્ત્વાતિભાવકમ્ ।
લીલાઙ્ગહારાભિનયં નાટ્યલક્ષણલક્ષિતમ્ ॥ ૭૨॥

સ્વરાલઙ્કારસંયુક્તમસ્વસ્થપુરુષાશ્રયમ્ ।
યદીદૃશં ભવેન્નાટ્યં નાટ્યધર્મી તુ સા સ્મૃતા ॥ ૭૩॥

લોકપ્રસિદ્ધં દ્રવ્યન્તુ યદા નાટ્યે પ્રયુજ્યતે ।
મૂર્તિમત્ સાભિલાષઞ્ચ નાટ્યધર્મી તુ સા સ્મૃતા ॥ ૭૪॥

આસન્નોક્તન્તુ યદ્વાક્યં ન શ્ૃણ્વન્તિ પરસ્પરમ્ ।
અનુક્તં શ્રૂયતે વાક્યં નાટ્યધર્મી તુ સા સ્મૃતા ॥ ૭૫॥

શૈલયાનવિમાનાનિ ચર્મવર્માયુધધ્વજાઃ ।
મૂર્તિમન્તઃ પ્રયુજ્યન્તે નાટ્યધર્મી તુ સા સ્મૃતા ॥ ૭૬॥

ય એકાં ભૂમિકાં કૃત્વા કુર્વીતૈકાન્તરેઽપરામ્ ।
કૌશલ્યાદેકકત્વાદ્વા નાટ્યધર્મી તુ સા સ્મૃતા ॥ ૭૭॥

યા ગમ્યા પ્રમદા ભૂત્વા ગમ્યા ભૂમિષુ યુજ્યતે ।
ગમ્યા ભૂમિષ્વગમ્યા ચ નાટ્યધર્મી તુ સા સ્મૃતા ॥ ૭૮॥

લલિતૈરઙ્ગવિન્યાસૈસ્તથોત્ક્ષિપ્તપદક્રમૈઃ ।
નૃત્યતે ગમ્યતે યચ્ચ નાટ્યધર્મી તુ સા સ્મૃતા ॥ ૭૯॥

યોઽયં સ્વભાવો લોકસ્ય સુખદુઃખક્રિયાત્મકઃ ।
સોઽઙ્ગાભિનયસંયુક્તો નાટ્યધર્મી તુ સા સ્મૃતા ॥ ૮૦॥

યશ્ચેતિહાસવેદાર્થો બ્રહ્મણા સમુદાહૃતઃ ।
દિવ્યમાનુષરત્યર્થં નાટ્યધર્મી તુ સા સ્મૃતા ॥ ૮૧॥

યશ્ચ કક્ષ્યાવિભાગોઽયં નાનાવિધિસમાશ્રિતઃ ।
રઙ્ગપીઠગતઃ પ્રોક્તો નાટ્યધર્મી તુ સા ભવેત્ ॥ ૮૨॥

નાટ્યધર્મીપ્રવૃત્તં હિ સદા નાટ્યં પ્રયોજયેત્ ।
ન હ્યઙ્ગાભિનયાત્કિઞ્ચિદૃતે રાગ પ્રવર્તતે ॥ ૮૩॥

સર્વસ્ય સહજો ભાવઃ સર્વો હ્યભિનયોઽર્થતઃ ।
અઙ્ગાલઙ્કારચેષ્ટાભિર્નાટ્યધર્મી પ્રકીર્તિતા ॥ ૮૪॥

એવં કક્ષ્યાવિભાગસ્તુ ધર્મી યુક્તય એવ ચ ।
વિજ્ઞેયા નાટ્યતત્ત્વજ્ઞૈઃ પ્રયોક્તવ્યાશ્ચ તત્ત્વતઃ ॥ ૮૫॥

ઉક્તો મયેહાભિનયો યથાવત્ શાખાકૃતો યશ્ચ કૃતોઽઙ્ગહારૈઃ ।
પુનશ્ચ વાક્યાભિનયં યથાવદ્વક્ષ્યે સ્વરવ્યઞ્જનવર્ણયુક્તમ્ ॥ ૮૬॥

ઇતિ ભરતીયે નાટ્યશાસ્ત્રે કરયુક્તિધર્મીવ્યઞ્જકો નામ
ત્રયોદશોઽધ્યાયઃ ।

Encoded by Sowmya Krishnapur krsowmya@yahoo at com

*Natya Shastra Chapter 13*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*